**आकर्षक** पु० आकर्षति सन्निकृष्टस्थं लौहं आ+कृष–ण्वुल्। (चुम्बक) इति ख्याते १अयस्कान्ते । २आकर्षणकर्त्तरि त्रि० आकर्षे नियुक्तः आकर्षादि० कन् । आकर्षनियुक्ते "आकषः निकषोपल इति रेफरहितः पाठः युक्तः" सि०कौ०।

**आकर्षण** न० आ+कृष–ल्युट्। अन्यत्र स्थितस्य वस्तुनः १बलेन अन्यत्र नयने "योषिदाकर्षणे चैव विनियोगः प्रकीर्त्तितः" तन्त्रम् । आकृष्यतेऽनेन करणे ल्युट्। २आकर्षणसाधने तन्त्रोक्ते षट्कर्मान्तर्गते विधानभेदे च । यथा "अथाकर्षणविधानानि कथयामि समासतः । यदुक्तं त्रैपुरे तन्त्रे यच्चोक्तं भूतडामरे । श्रीवीजं मान्मथं वीजं लज्जावीजं समुद्धरेत् । प्रथमं प्रणवं दत्त्वा त्रिपुरादेविपदन्ततः । अमुकीति पदं द्व्यन्तमाकर्षेति द्विधा पदम् । स्वाहान्तं मन्त्रमुद्धृत्य जपेद्दशसहस्रकम् । षट्कोणञ्च समालिख्य रक्तचन्दनकुङ्कुमैः । षडङ्गङ्कारयेन्मन्त्री लज्जावीजसमन्वितम् । षड्दीर्घभाक्स्वरैरेव नादविन्दुविभूषितम् । रक्तपुष्पाक्षतधूपनैवेद्यैः परिपूज्य ताम् । भावयंश्चेतसा देवीं त्रिनेत्रां चन्द्रशेखराम् । बालार्ककिरणप्रख्यां सिन्दूरारुणविग्रहाम् । पद्मञ्च दक्षिणे पाणौ जपमालाञ्च वामके । मन्त्रस्यास्य प्रसादेन रम्भामपि तथोर्व्वशीम् । आकर्षयेच्च सन्देहः किं पुनर्मानुषीमिह । भूर्जपत्रे समालिख्य कुङ्कुमालक्तवारिणा । काश्मीरागुरुकस्तूरीरोचनामिलितेन तु । अनामारक्तमिश्रेण कामलाक्षीमनुं जपेत् । (आ श्रीं कामलाक्षि अमुकीमाकर्षय आकर्षय हुँ फट्)। इमं मन्त्रं जपेदादौ सहस्रैकं जपेत् पुनः । भूर्जपत्रं समादाय गुलिकां कारयेत् सुधीः । तेनैव साध्यपादोत्थमृत्तिकापङ्कवेष्टितम् । शोषितं तेजसा भानोर्वेष्टयेत् कटुभिस्त्रिभिः । प्रतिमां स्त्रीनिभां कृत्वा तस्यां क्षिपेत्तथोदरे । गुलिकां पातयेत् पात्रे प्रतिमां साध्यरूपिणीम् । तादृशाभिमुखोभूत्वा निर्जने निशि साधकः। यावद्गच्छति चित्तञ्च तावद्रूपं जपेन्मनुम् । यावदायाति संत्रस्ता मदनालसविग्रहा" तन्त्रसा० । तत्र होमसाधनद्रव्यमुक्तं तत्रैव । "आकर्षणे तथा लोध्रं सतिलं मधुरान्वितम्" ।

**आकर्षणी** स्त्री आकृष्यतेऽनया आ+कृष–ल्युट् टित्त्वात् ङीप् । उच्चस्थपुष्पाद्याहरणार्थे (आङ्शि) १यष्टिकाभेदे । २मुद्राभेदे च मुद्राशब्दे विवरणम् ।

**आकर्षा(षा)दि** पु० पाणिन्युक्ते कन् प्रत्ययनिमित्ते शब्दगणभेदे आक(ष)र्ष, त्सरु, पिशाच, पिचण्ड, अशनि, अश्मन्, चय, निचय, विजय, जय, आचय, नय, पाद, दीप, ह्रद, ह्राद, ह्लाद, गद्गद, शकुनि "आकर्षा(षा)दिभ्यः कन्" पा० ।

**आकर्षिन्** त्रि० आ+कृष–णिनि । आकर्षकारके स्त्रियां ङीप् । समुपूर्व्वात् तु । दूरगामिनि गन्धे । सहि दूरादेव नासिकां प्राप्य घ्रातृपुरुषं स्वग्रहणायानुकूलयन् समाकर्षतीवेति तस्य तथात्वम् ।

**आकलन** न० आ+कल–ल्युट् । १आकाङ्क्षायाम्, २ग्रहणे ३संग्रहे ४गणने ५ऽनुसन्धाने च "सैव्यापि सानुनयमाकलनाय यन्त्रा" माघः ।

**आकलित** त्रि० आ+कल–क्त । १अनुसृते २ग्रथिते च । प्रहितभुजाऽऽकलितस्तनेन निन्ये" । "स्तुवसीस्तुताकलिताधराम्बराम्" इति च माघः ।

**आकल्प** पु० आ+क्लृप–णिच्–घञ् । १वेशरचनायाम्, २भूषणे च "रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम्" शिवध्यानम् । "आकल्पसाधनैस्तैस्तैरुपसेदुः प्रसाधकाः" "अक्षतकविधिसर्व्वाङ्गीण माकल्पजातम्" रघुः । २कल्पपर्य्यन्ते अव्य०। "आकल्पं नरकं भुङ्क्ते" इति स्मृतिः

**आकष** पु० आकष्यते यत्र कष–अच् । स्वर्णादिकषणसाधने (कोष्ठि) प्रस्तरभेदे । आकषे नियुक्तः कन् । आकषकः तत्रनियुक्ते त्रि० तेन चरति ठन् आकषिकः तेन चारिणि । स्त्रियां ङीप् ।

**आकस्मिक** त्रि० अकस्मादित्यव्ययं कारणाभावे कारणं विना भवः विनया० ठक् टिलोपः । अकस्माद्भवे । स्त्रियां ङीप् । जगत आकस्मिकत्ववादिनश्चार्वाका इत्यमाहुः । अकस्मादेव भवति कार्य्यं न किञ्चिदपेक्षमिति तदेतन्मतम् गौ०सू० उक्तम् । "अनिमित्ततोभावोत्पत्तिः कण्टकतैक्ष्ण्यादिवत्" एतदवतरणिकायां वृत्तिः । यदि कार्य्याणामाकस्मिकत्वं तदा न परमाण्वादीनामुपादानत्वं न वेश्वरस्य निमित्तत्वमत आकस्मिकत्वनिराकरणाय प्रकरणमारभते तत्र पूर्व्वपक्ष सूत्रम् अनिमित्तत इत्यादि । प्रथमार्थे तसिल् । अनिमित्ता भावोत्पत्तिरित्यर्थः तथा च घटाद्युत्पत्तिर्न कारणनियम्या उत्पत्तित्वात् कण्टकतैक्ष्ण्यमयूरचित्रताद्युत्पत्तिवत् इति सूत्रतात्पर्य्यम्" कुसुमा० हरि० "अकस्मादिति किं हेतुनिषेधपरं वा स्वातिरिक्तहेतुनिषेधपरं पारमार्थिकहेतुनिषेधपरं वा । अतोभयत्राहेतुकत्वमन्त्ये ऽलीकहेतुकत्वं पर्य्यवस्यति" । तथा च आकस्मिकशब्दस्य तादृशार्थचतुष्टयपरता । "स्वभावा-